श्रीगणेशाय नमः ॥ ॐ नमो मृतुञ्जयाय ॥

नन्दिकेश्वर उवाचः

कैलासस्योत्तरे शृङ्गे, शुद्धस्फटिकसन्निभे ।

तमोगुणबिहीने तु, जरामृत्यु विवर्जिते ॥

सर्वार्थ संपदाधारे, सर्वज्ञानकृतालये ।

कृताञ्जलि पुटोब्रह्मा, ध्यानासीनं सदाशिवम् ॥

पप्रच्छ प्रणतो भूत्वा, जानुभ्यामवनिं गतः ।

सर्वार्थ सम्पदाधार, ब्रह्मा लोकपितामहः ॥

ब्रह्मोवाचः

केनोपायेन देवेश, चिरायुर्लोमशोऽभवत् ।

तन्मे ब्रूहि महेशान, लोकानां हितकाम्यया ॥

श्रीसदाशिव उवाचः

शृणु ब्रह्मन् प्रवक्ष्यामि, चिरायुर्मुनिसत्तमः ।

सञ्जातः कर्मणा येन, व्याधिमृत्यु विवर्जितः ॥

तस्मिन्नेकार्णवे घोरे, सलिलौघ परिप्लुते ।

कृतान्त भयनाशाय, स्तुतो मृत्युञ्जयः शिवः ॥

तस्य संकीर्त्तनान्नित्यं, मुनिर्मृत्यु विवर्जितः ।

तमेव कीर्तयन् ब्रह्मन्, मृत्युजेतुं न संशयः ॥

लोमश उवाचः

ॐ देवाधिदेवदेवेश, सर्वप्राणभृतांवर ।

प्राणिनामपि नाथस्त्वं, मृत्युञ्जय नमोऽस्तु ते ॥

देहिनां जीवभूतोऽसि, जीवोजीवस्य कारणम् ।

जगतां रक्षकस्त्वं वै मृत्युञ्जय नमोऽस्तु ते ॥

हेमाद्रि शिखराकार, सुधावीचि मनोहर ।

पुण्डरीक परं ज्योति, मृत्युञ्जय नमोऽस्तु ते ॥

ध्यानाधार महाज्ञान, सर्वज्ञानैककारण ।

परित्रातासि लोकानां, मृत्युञ्जय नमोऽस्तु ते ॥

निहता येन कालेन, सदेवासुरमानुषाः ।

गन्धर्वाप्सरसश्चैव, सिद्धविद्याधरास्तथा ॥

साध्याश्च बसवो रुद्रास्, तथाश्विनि सुताबुभौ ।

मरुतश्च दिशो नागाः, स्थावरा जङ्गमस्तथा ॥

जितः सोऽपि त्वया ध्यानान्, मृत्युञ्जय नमोऽस्तु ते ।

ये ध्यायान्त परां मूर्तिम्, पूजयन्त्यमरादय ॥

न ते मृत्यु वशं यान्ति, मृत्युञ्जय नमोऽस्तु ते ।

त्वमोङ्कारोसि वेदानां, देवानां च सदाशिवः ।

आधारशक्तिः शक्तिनां, मृत्युञ्जय नमोऽस्तु ते ॥

स्थावरे जङ्गमे वापि, यावत्तिष्ठति देहगः ।

जीवत्यपत्यलोकोऽयं, मृत्युञ्जय नमोऽस्तु ते ॥

सोमसूर्याग्नि मध्यस्थ, व्योमव्यापिन् सदाशिव ।

कालत्रय महाकाल, मृत्युञ्जय नमोऽस्तु ते ॥

प्रबुद्धे चा प्रबुद्धे च, त्वमेव सृजते जगत् ।

सृष्टिरूपेण देवेश, मृत्युञ्जय नमोऽस्तु ते ॥

ब्योम्नि त्वं ब्योमरूपोऽसि, तेजः सर्वत्र तेजसि ।

ज्ञानिनां ज्ञानरूपोऽसि, मृत्युञ्जय नमोऽस्तु ते ॥

जगज्जीवो जगत्प्राणः, स्रष्टा त्वं जगतः प्रभुः ।

कारणं सर्वतीर्थानां, मृत्युञ्जय नमोऽस्तु ते ॥

नेता त्वमिन्द्रियाणां च, सर्वज्ञान प्रबोधकः ।

सांख्ययोगश्च हंसश्च, मृत्युञ्जय नमोऽस्तु ते ॥

रूपातीतः सरूपश्च, पिण्डस्थ पदमेव च ।

चतुर्युग कलाधार, मृत्युञ्जय नमोऽस्तु ते ॥

रेचके बह्निरूपोऽसि, सोमरूपोऽसि पूरके ।

कुम्भके शिवरूपोऽसि, मृत्युञ्जय नमोऽस्तु ते ॥

क्षयङ्करोऽसि पापानां, पुण्यानामपि वर्द्धनम् ।

हेतुस्त्वं श्रेयसां नित्यं, मृत्युञ्जय नमोऽस्तु ते ॥

सर्वमायाकलातीत, सर्वेन्द्रिय परावर ।

सर्वेन्द्रिय कलाधीश, मृत्युञ्जय नमोऽस्तु ते ॥

रूपं गन्धो रसः स्पर्शः, शब्दः संस्कार एव च ।

त्वत्तः प्रकाश एतेषां, मृत्युञ्जय नमोऽस्तु ते ॥

चतुर्विधानां सृष्टीनां, हेतुस्त्वं कारणेश्वर ।

भावाभाव परिच्छिन्न, मृत्युञ्जय नमोऽस्तु ते ॥

त्वमेको निष्कलो लोके, सकलं भुवन त्रये ।

अतिसूक्ष्मातिरूपस्त्वं, मृत्युञ्जय नमोऽस्तु ते ॥

त्वं प्रवोधस्त्वमाधार, त्वद्बीजं भुवनत्रयम् ।

सत्वं रजस्तमस्त्वं हि, मृत्युञ्जय नमोऽस्तु ते ॥

त्वं सोमस्त्वं दिनेशश्च, त्वमात्मा प्रकृतेः परः ।

अष्टात्रिंशत्कलानाथ, मृत्युञ्जय नमोऽस्तु ते ॥

सर्वेन्द्रियाणामाधारः, सर्वभूत गुणाश्रयः ।

सर्वज्ञानमयानन्त, मृत्युञ्जय नमोऽस्तु ते ॥

त्वमात्मा सर्वभूतानां, गुणानां त्वमधीश्वरः।

सर्वानन्दमयाधार, मृत्युञ्जय नमोऽस्तु ते ॥

त्वं यज्ञः सर्वयज्ञानां, त्वं बुद्धिर्बोध लक्षणा ।

शब्दब्रह्मस्त्वमोङ्कारो, मृत्युञ्जय नमोऽस्तु ते ॥

श्रीसदाशिव उवाचः

एवं सङ्कीर्त्तयेद्यस्तु शुचिस्तद्गत मानसः ।

भक्त्या श्रृणोति यो ब्रह्मन्, न स मृत्युवशो भवेत् ॥

न च मृत्यु भयं तस्य, प्राप्तकालं च लङ्घयेत् ।

अपमृत्युभयं तस्य, प्रणश्यति न संशयः ॥

व्याधयो नोपपद्यन्ते, नोपसर्ग भयं भवेत् ।

प्रत्यासन्नान्तरे काले, शतैकावर्तने कृते ॥

मृत्युर्नजायते तस्य, रोगान्मुञ्चति निश्चितम् ।

पञ्चम्यां वा दशम्यां वा, पौर्णमास्यामथापि वा ॥

शतमावर्तयेद्यस्तु, शतवर्षं स जीवति ।

तेजस्वी बलसम्पन्नो, लभते श्रियमुत्तममाम् ॥

त्रिविधं नाशयेत्पापं, मनोवाक्काय सम्भवम् ।

अभिचाराणि कर्माणि, कर्माण्याथर्वणानि च ॥

क्षीयन्ते नात्र सन्दोहो, दुःस्वप्नश्च विनश्यति ।

इदं रहस्यं परमं, देवदेवस्य शूलिनः ।

दुःस्वप्न नाशनं पुण्यं, सर्वविघ्न विनाशनम् ॥

॥ इति श्री शिवब्रह्मसंवादे श्रीमृत्युञ्जयस्तोत्रं सम्पूर्णम् ॥